# Samba Panchashika

# સામ્બપઞ્ચાશિકા

## Document Information

Text title : sAmbapanchAshikA

File name : sAmbapanchAshikA.itx

Category : shiva

Location : doc_shiva

Proofread by : Pallasena Narayanaswami ppnswami at gmail.com

Description-comments : Brihatstotraratnakara 1, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 211

Latest update : February 20, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 18, 2025

*sanskritdocuments.org*

# સામ્બપઞ્ચાશિકા

શ્રીગણેશાય નમઃ ॥

શબ્દાર્થત્વવિવર્તમાનપરમજ્યોતીરુચો ગોપતે-
    રુદ્ગીથોઽભ્યુદિતઃ પુરોઽરુણતયા યસ્ય ત્રયીમણ્ડલમ્ ।
ભાવ્યદ્વર્ણપદક્રમેરિતતમઃ સપ્તસ્વરાશ્વૈર્વિયદ્-
    વિદ્યાસ્યન્દનમુન્નયન્નિવ નમસ્તસ્મૈ પરબ્રહ્મણે ॥ ૧॥

ઓમિત્યન્તર્નદતિ નિયતં યઃ પ્રતિપ્રાણિ શબ્દો
    વાણી યસ્માત્પ્રસરતિ પરશબ્દતન્માત્રગર્ભા ।
પ્રાણાપાનૌ વહતિ ચ સમૌ યો મિથો ગ્રાસસક્તૌ
    દેહસ્થં તં સપદિ પરમાદિત્યમાદ્યં પ્રપદ્યે ॥ ૨॥

યસ્ત્વક્ચ્ચક્ષુઃશ્રવણરસનાઘ્રાણપાણ્યઙ્ઘ્રિવાણી-
    પાયૂપસ્થસ્થિતિરપિ મનોબુદ્ધ્યદ્ધ્યહઙ્કારમૂર્તિઃ ।
તિષ્ઠત્યન્તર્બહિરપિ જગદ્ભાસયન્દ્વાદશાત્મા
    માર્તણ્ડં તં સકલકરણાધારમેકં પ્રપદ્યે ॥ ૩॥

યા સા મિત્રાવરુણસદનાદુચ્ચરન્તી ત્રિષષ્ટિં
    વર્ણાનત્ર પ્રકટકરણૈઃ પ્રાણસઙ્ગાત્પ્રસૂતાન્ ।
તાં પશ્યન્તીં પ્રથમમુદિતાં મધ્યમાં બુદ્ધિસંસ્થાં
    વાચં વક્ત્રે કરણવિશદાં વૈખરીં ચ પ્રપદ્યે ॥ ૪॥

ઊર્ધ્વાધઃસ્થાન્યતનુભુવનાન્યન્તરા સન્નિવિષ્ટા
    નાનાનાડિપ્રસવગહના સર્વભૂતાન્તરસ્થા ।
પ્રાણાપાનગ્રસનનિરતૈઃ પ્રાપ્યતે બ્રહ્મનાડી
    સા નઃ શ્વેતા ભવતુ પરમાદિત્યમૂર્તિઃ પ્રસન્ના ॥ ૫॥

ન બ્રહ્માણ્ડવ્યવહિતપથા નાતિશીતોષ્ણરૂપા
    નો વા નક્તન્દિવગમમિતાઽતાપનીયાપરાહ્નઃ ।

વૈકુણ્ઠીયા તનુરિવ રવે રાજતે મણ્ડલસ્થા
    સા નઃ શ્વેતા ભવતુ પરમાદિત્યમૂર્તિઃ પ્રસન્ના ॥ ૬॥

યત્રારૂઢં ત્રિગુણવપુષિ બ્રહ્મ તદ્બિન્દુરૂપં
    યોગીન્દ્રાણાં યદપિ પરમં ભાતિ નિર્વાણમાર્ગઃ ।
ત્ર્યાધારઃ પ્રણવ ઇતિ યન્મણ્ડલં ચણ્ડરશ્મે-
    રન્તઃસૂક્ષ્મં બહિરપિ બૃહન્મુક્તયેઽહં પ્રપન્નઃ ॥ ૭॥

યસ્મિન્સોમઃ સુરપિતૃનરૈરન્વહં પીયમાનઃ
    ક્ષીણઃ ક્ષીણઃ પ્રવિશતિ યતો વર્ધતે ચાપિ ભૂયઃ ।
યસ્મિન્વેદા મધુનિ સરઘાકારવદ્ભન્તિ ચાગ્રે
    તચ્ચણ્ડાંશોરમિતમમૃતં મણ્ડલસ્થં પ્રપદ્યે ॥ ૮॥

ઐન્દ્રીમાશાં પૃથુકવપુષા પૂરયિત્વા ક્રમેણ
    ક્રાન્તાઃ સપ્ત પ્રકટહરિણા યેન પાદેન લોકાઃ ।
કૃત્વા ધ્વાન્તં વિગલિતબલિવ્યક્તિ પાતાલલીનં
    વિશ્વાલોકઃ સ જયતિ રવિઃ સત્ત્વમેવોર્ધ્વરશ્મિઃ ॥ ૯॥

ધ્યાત્વા બ્રહ્મ પ્રથમમતનુ પ્રાણમૂલે નદન્તં
    દૃષ્ટ્વા ચાન્તઃ પ્રણવમુખરં વ્યાહૃતીઃ સમ્યગુક્ત્વા ।
યત્તદ્વેદે તદિતિ સવિતુર્બ્રહ્મણોક્તં વરેણ્યં
    તદ્ભર્ગાખ્યં કિમપિ પરમં ધામગર્ભં પ્રપદ્યે ॥ ૧૦॥

ત્વાં સ્તોષ્યામિ સ્તુતિભિરિતિ મે યસ્તુ ભેદગ્રહોઽયં
    સૈવાવિદ્યા તદપિ સુતરાં તદ્બિનાશાય યુક્તઃ ।
સ્તૌમ્યેવાહં ત્રિવિધમુદિતં સ્થૂલસૂક્ષ્મં પરં વા
    વિદ્યોપાયઃ પર ઇતિ બુધૈર્ગીયતે ખલ્વવિદ્યા ॥ ૧૧॥

યોઽનાદ્યન્તોઽપ્યતનુરગુણોઽણોરણીયાન્મહીયાન્-
    વિશ્વાકારઃ સગુણ ઇતિ વા કલ્પનાકલ્પિતાઙ્ગઃ ।
નાનાભૂતપ્રકૃતિવિકૃતીર્દર્શયન્ ભાતિ યો વા
    તસ્મૈ તસ્મૈ ભવતુ પરમાદિત્ય નિત્યં નમસ્તે ॥ ૧૨॥

તત્ત્વાખ્યાને ત્વયિ મુનિજના નેતિ નેતિ બ્રુવન્તઃ
    શ્રાન્તાઃ સમ્યક્ત્વમિતિ ન ચ તૈરીદૃશો વેતિ ચોક્તઃ ।
તસ્માત્તુભ્યં નમ ઇતિ વચોમાત્રમેવાસ્મિ વચ્મિ
    પ્રાયો યસ્માત્પ્રસરતિતરાં ભારતી જ્ઞાનશર્ભા ॥ ૧૩॥

સર્વાઙ્ગીણઃ સકલવપુષામન્તરે યોऽન્તરાત્મા
    તિષ્ઠન્કાષ્ઠે દહન ઇવ નો દૃશ્યસે યુક્તિશૂન્યૈઃ ।
યશ્ચ પ્રાણારણિષુ નિયતૈર્મથ્યમાનાસુ સદ્ભિ-
    ર્દૃશ્ય જ્યોતિર્ભવસિ પરમાદિત્ય તસ્મૈ નમસ્તે ॥ ૧૪॥

સ્તોતા સ્તુત્યઃ સ્તુતિરિતિ ભવાન્કર્તૃકર્મક્રિયાત્મા
    ક્રીડત્યેકસ્તવ નુતિવિધાવસ્વતન્ત્રસ્તતોऽહમ્ ।
યદ્વા વચ્મિ પ્રણયસુભગં ગોપતે તચ્ચ તથ્યં
    ત્વત્તો હ્યન્યત્કિમિવ જગતાં વિદ્યતે તન્મૃષા સ્યાત્ ॥ ૧૫॥

જ્ઞાનં નાન્તઃકરણરહિતં વિદ્યતેऽસ્મદ્વિધાનાં
    ત્વં ચાત્યન્તં સકલકરણાગોચરત્વાદચિન્ત્યઃ ।
ધ્યાનાતીતસ્ત્વમિતિ ન વિના ભક્તિયોગેન લભ્ય-
    સ્તસ્માદ્ભક્તિં શરણમમૃતપ્રાપ્તયેऽહં પ્રપન્નઃ ॥ ૧૬॥

હાર્દં હન્તિ પ્રથમમુદિતા યા તમઃસંશ્રિતાનાં
    સત્ત્વોદ્રેકાત્તદનુ ચ રજઃ કર્મયોગક્રમેણ ।
સ્ત્રભ્યસ્તા ચ પ્રથયતિતરાં સત્ત્વમેવ પ્રપન્ના
    નિર્વાણાય વ્રજતિ શમિનાં તેऽર્ક ભક્તિસ્ત્રયીવ ॥ ૧૭॥

તામાસાદ્ય શ્રિયમિવ ગૃહે કામધેનું પ્રવાસે
    ધ્વાન્તે ભાતિં ધૃતિમિવ વને યોજને બ્રહ્મનાડિમ્ ।
નાવં ચાસ્મિન્ વિષમવિષયગ્રાહસંસારસિન્ધૌ
    ગચ્છેયં તે પરમમમૃતં યન્ન શીતં ન ચોષ્ણમ્ ॥ ૧૮॥

અગ્નીષોમાવખિલજગતઃ કારણં તૌ મયૂખૈઃ
    સર્ગાદાને સૃજસિ ભગવન્હ્રાસવૃદ્ધિક્રમેણ ।
તાવેવાન્તર્વિષુવતિ સમૌ જુહ્વતામાત્મવહ્નૌ
    દ્વાવપ્યસ્તં નયસિ યુગપન્મુક્તયે ભક્તિભાજામ્ ॥ ૧૯॥

સ્થૂલત્વં તે પ્રકૃતિગહનં નૈવ લક્ષ્યં હ્યનન્તં
    સૂક્ષ્મત્વં વા તદપિ સદસદ્વ્યક્ત્યભાવાદચિન્ત્યમ્ ।
ધ્યાયામીત્થં કથમવિદિતં ત્વામનાદ્યન્તમન્ત-
    સ્તસ્માદર્ક પ્રણિયિનિ મયિ સ્વાત્મનૈવ પ્રસીદ ॥ ૨૦॥

યત્તદ્વેદ્યં કિમપિ પરમં શબ્દતત્ત્વં ત્વમન્ત-

સ્તત્સદ્વ્યક્તિં જિગમિષુ શનૈર્લાન્તિ માત્રાકલાઃ ખે ।
અવ્યક્તેન પ્રણવવપુષા બિન્દુનાદોદિતં સ-
ચ્છબ્દબ્રહ્મોચ્ચરતિ કરણવ્યઞ્જિતં વાચકં તે ॥ ૨૧॥

પ્રાતઃસન્ધ્યારુણકિરણભાગૃઙ્મ્યયં રાજસં યન્-
મધ્યે ચાપિ જ્વલદિવ યજુઃ શુક્લભાઃ સાત્ત્વિકં વા ।
સાયં સામાસ્તમિતકિરણં યત્તમોલ્લાસિરૂપં
સાહ્નઃ સર્ગસ્થિતિલયવિધાવાકૃતિસ્તે ત્રયીવ ॥ ૨૨॥

યે પાતાલોદધિમુનિનગદ્વીપલોકાધિબીજ-
ચ્છન્દોભૂતસ્વરમુખનદત્સપ્તસપ્તિં પ્રપન્નાઃ ।
યે ચૈકાશ્ચ નિરવયવવાગ્ભાવમાત્રાધિરૂઢં
તે ત્વામેવ સ્વરગુણકલાવર્જિતં યાન્ત્યનશ્વમ્ ॥ ૨૩॥

દિવ્યં જ્યોતિઃ સલિલપવનૈઃ પૂરયિત્વા ત્રિલોકી-
મેકીભૂતં પુનરપિ ચ તત્સારમાદાય ગોભિઃ ।
અન્તર્લીનો વિશસિ વસુધાં તદ્ગતઃ સૂયસેઽન્નં
તચ્ચ પ્રાણાંસ્ત્વમિતિ જગતાં પ્રાણભૃત્સૂર્ય આત્મા ॥ ૨૪॥

અગ્નીષોમૌ પ્રકૃતિપુરુષૌ બિન્દુનાદૌ ચ નિત્યૌ
પ્રાણાપાનાવપિ દિનનિશે યે ચ સત્યાનૃતે દ્વે ।
ધર્માધર્મૌ સદસદુભયં યોઽન્તરાવેશ્ય યોગી
વર્તેતાત્મન્યુપરતમતિર્નિર્ગુણં ત્વાં વિશેત્સઃ ॥ ૨૫॥

ગર્ભાધાનપ્રસવવિધયે સુપ્તયોરિન્દુભાસા
સાપત્યેનાભિમુખમિવ ખે કાન્તયોર્મધ્યસંસ્થઃ ।
દ્યાવાપૃથ્વ્યોર્વદનકમલે ગોમુખૈર્બોધયિત્વા
પર્યાયેણાપિબસિ ભગવન્ ષડ્રસાસ્વાદલોલઃ ॥ ૨૬॥

સોમં પૂર્ણામૃતમિવ ચરું તેજસા સાધયિત્વા
કૃત્વા તેનાનલમુખજગત્તર્પણં વૈશ્વદેવમ્ ।
આમાવસ્યં વિઘસમિવ ખે તત્કલાશેષમશ્નન્-
બ્રહ્માણ્ડાન્તર્ગૃહપતિરિવ સ્વાત્મયાગં કરોષિ ॥ ૨૭॥

કૃત્વા નક્તન્દિનમિવ જગદ્બીજમાવ્યક્તિકં યત્-
તત્રૈવાન્તર્દિનકર તથા બ્રાહ્મમન્યત્તતોઽલ્પમ્ ।
દૈવં પિત્ર્યં ક્રમપરિગતં માનુષં ચાલ્પમલ્પં

  કુર્વન્કુર્વન્કલયસિ જગત્પઞ્ચધાવર્તનાભિઃ ॥ ૨૮॥

તત્ત્વાલોકે તપન સુદિને યે પરં સમ્પ્રબુદ્ધા
  યે વા ચિત્તોપશમરજનીયોગનિદ્રામુપેતાઃ ।
તેઽહોરાત્રોપરમપરમાનન્દસન્ધ્યાસુ સૌરં
  ભિત્ત્વા જ્યોતિઃપરમપરમં યાન્તિ નિર્વાણસંજ્ઞમ્ ॥ ૨૯॥

આ બ્રહ્મેદ નવમિવ જગજ્જઙ્ગમસ્થાવરાન્તં
  સર્ગે સર્ગે વિસૃજસિ રવે ગોભિરુદ્રિક્તસોમૈઃ ।
દીપ્તૈઃ પ્રત્યાહરસિ ચ લયે તદ્યથાયોનિ ભૂયઃ
  સર્ગાન્તાદૌ પ્રકટવિભવાં દર્શયન્ રશ્મિલીલામ્ ॥ ૩૦॥

શ્રિત્વા નિત્યોપચિતમુચિતં બ્રહ્મતેજઃપ્રકાશં
  રૂપં સર્ગસ્થિતિલયમુચા સર્વભૂતેષુ મધ્યે ।
અન્તેવાસિષ્વિવ સુગુરુણા યઃ પરોક્ષઃ પ્રકૃત્યા
  પ્રત્યક્ષોઽસૌ જગતિ ભવતા દર્શિતઃ સ્વાત્મનાત્મા ॥ ૩૧॥

લોકાઃ સર્વે વપુષિ નિયતં તે સ્થિતિસ્ત્વં ચ તેષા-
  મેકૈકસ્મિન્યુગપદગુણો વિશ્વહેતોર્ગુણીવ ।
ઇત્થમ્ભૂતે ભવતિ ભગવન્નત્વદન્યોઽસ્મિ સત્યં
  કિં તુ જ્ઞસ્ત્વં પરમપુરુષોઽહં પ્રકૃત્યૈવ ચાજ્ઞઃ ॥ ૩૨॥

સઙ્કલ્પેચ્છાદ્યખિલકરણપ્રાણવાણ્યો વરેણ્યાઃ
  સમ્પન્ના મે ત્વદભિનવનાજ્જન્મ ચેદં શરણ્યમ્ ।
મન્યે ચાસ્તં જિગમિષુ શનૈઃ પુણ્યપાપદ્વયં તદ્-
  ભક્તિશ્રદ્ધે તવ ચરણયોરન્યથા નો ભવેતામ્ ॥ ૩૩॥

સત્યં ભૂયો જનનમરણે ત્વત્પ્રપન્નેષુ ન સ્ત-
  સ્તત્રાપ્યેકં તવ નુતિફલં જન્મ યાચે તદિત્થમ્ ।
ત્રૈલોક્યેશઃ શમ ઇવ પરઃ પુણ્યકાયોઽપ્યયોનિઃ
  સંસારાબ્ધૌ પ્લવ ઇવ જગત્તારણાય સ્થિરઃ સ્યામ્ ॥ ૩૪॥

સૌષુમ્ણેન ત્વમમૃતપથેનૈત્ય શીતાંશુભાવં
  પુષ્ણાસ્યગ્રે સુરનરપિતૄન્ શાન્તભાભિઃ કલાભિઃ ।
પશ્ચાદમ્ભો વિશસિ વિવિધાશ્ચૌષધીસ્તદ્ગતોઽપિ
  પ્રીણાસ્યેવં ત્રિભુવનમતસ્તે જગન્મિત્રતાર્ક ॥ ૩૫॥

મન્દાક્રાન્તે તમસિ ભવતા નાથ દોષાવસાને
 નાન્તર્લીના મમ મતિરિયં ગાઢનિદ્રાં જહાતિ ।
તસ્માદસ્તઙ્ગમિતતમસા પદ્મિનીવાત્મભાસા
 સૌરીત્યેષા દિનકર પરં નીયતામાશુ બોધમ્ ॥ ૩૬॥

યેન ગ્રાસીકૃતમિવ જગત્સર્વમાસીત્તદસ્તં
 ધ્વાન્તં નીત્વા પુનરપિ વિભો તદ્દયાઘ્રાતચિત્તઃ ।
ધત્સે નક્તન્દિનમપિ ગતી શુક્લકૃષ્ણે વિભજ્ય
 ત્રાતા તસ્માદ્ભવ પરિભવે દુષ્કૃતે મેઽપિ ભાનો ॥ ૩૭॥

આસંસારોપચિતસદસત્કર્મબન્ધાશ્રિતાના-
 માધિવ્યાધિપ્રજનમરણક્ષુત્પિપાસાર્દિતાનામ્ ।
મિથ્યાજ્ઞાનપ્રબલતમસા નાથ ચાન્ધીકૃતાનાં
 ત્વં નસ્ત્રાતા ભવ કરુણયા યત્રતત્રસ્થિતાનામ્ ॥ ૩૮॥

સત્યાસત્યસ્ખલિતવચસાં શૌચલજ્જોજ્ઝીતા-
 નામજ્ઞાનાનામફલસફલપ્રાર્થનાકાતરાણામ્ ।
સર્વાવસ્થાસ્વખિલવિષયાભ્યસ્તકૌતૂહલાનાં
 ત્વં નસ્ત્રાતા ભવ પિતૃતયા ભોગલોલાર્ભકાણામ્ ॥ ૩૯॥

યાવદ્દેહં જરયતિ જરા નાન્તકાદેત્ય દૂતી
 નો વા ભીમસ્ત્રિફણભુજગાકારદુર્વારપાશઃ ।
ગાઢં કણ્ઠે લગતિ સહસા જીવિતં લેલિહાન-
 સ્તાવદ્ભક્તાભયદ સદયં શ્રેયસે નઃ પ્રસીદ ॥ ૪૦॥

વિશ્વપ્રાણગ્રસનરસનાટોપકોપપ્રગલ્-ભં
 મૃત્યોર્વક્ત્રં દહનનયનોદ્દામદંષ્ટ્રાકરાલમ્ ।
યાવદૃષ્ટ્વા વ્રજતિ ન ભિયા પઞ્ચતામેષ કાય-
 સ્તાવન્નિત્યામૃતમય રવે પાહિ નઃ કાન્દિશીકાન્ ॥ ૪૧॥

શબ્દાકારં વિયદિવ વપુસ્તે યજુઃસામધામ્નઃ
 સપ્તચ્છન્દાંસ્યપિ ચ તુરગા ઋઙ્મયં મણ્ડલં ચ ।
એવં સર્વશ્રુતિમયતયા મદ્દયાનુગ્રહાદ્વા
 ક્ષિપ્રં મત્તઃ કૃપણકરુણાક્રન્દમાકર્ણયેમમ્ ॥ ૪૨॥

નાશં નાસ્માચ્ચરણશરણા યાન્ત્યપિ ગ્રસ્યમાના
 દેવૈરિત્થં સિતમિવ યશો દર્શયન્સ્વં ત્રિલોક્યામ્ ।

મન્યે સોમં ક્ષતતનુમમાગર્ભવૃદ્ધ્યા વિવસ્ત્રન્
    શુક્લાં છાયાં નયસિ શનકૈઃ સ્વાં સુષુમ્ણાંશુભાસા ॥ ૪૩॥

આસ્તાં જન્મપ્રભૃતિ ભવતઃ સેવનં તદ્ધિ લોકે
    વાચ્યં કેનાપરિમિતફલં ભુક્તિમુક્તિપ્રકારમ્ ।
જ્યોતિર્માત્રં સ્મૃતિપથમિતો જીવિતાન્તેઽપિ ભાસ્વન્-
    નિર્વાણાય પ્રભવસિ સતાં તેન તે કઃ સમોઽન્યઃ ॥ ૪૪॥

અપ્રત્યક્ષત્રિદશભજનાદ્યત્પરોક્ષં ફલં તત્-
    પુંસાં યુક્તં ભવતિ હિ સમં કારણેનૈવ કાર્યમ્ ।
પ્રત્યક્ષસ્ત્વં સકલજગતાં યત્સમક્ષં ફલં મે
    યુષ્મદ્ભક્તેઃ સસુચિતમતસ્તત્તુ યાચે યથા ત્વામ્ ॥ ૪૫॥

યે ચારોગ્યં દિશતિ ભગવાન્સેવિતોઽપ્યેવમાહુ-
    સ્તે તત્ત્વજ્ઞા જગતિ સુભગા ભોગયોગપ્રધાનાઃ ।
ભુક્તેર્મુક્તેરપિ ચ જગતાં યચ્ચ પૂર્ણં સુખાનાં
    તસ્યાન્યોઽર્કાદમૃતવપુષઃ કો હિ નામાસ્તુ દાતા ॥ ૪૬॥

હિત્વા હિત્વા ગુરુચપલતામપ્યનેકાન્નિજાર્થાન્-
    યૈરેકાર્થીકૃતમિવ ભવત્સેવનં મત્પ્રિયાર્થમ્ ।
તેષામિચ્છામ્યુપકૃતિમહં સ્વેન્દ્રિયાણાં પ્રિયાણા-
    માદૌ તસ્માન્મમ દિનપતે દેહિ તેભ્યઃ પ્રસાદમ્ ॥ ૪૭॥

કિં તન્નામોચ્ચરતિ વચનં યસ્ય નોચ્ચારકસ્ત્વં
    કિં તદ્વાચ્યં સકલવચસાં વિશ્વમૂર્તે ન યત્ત્વમ્ ।
તસ્માદુક્તં યદપિ તદપિ ત્વન્નુતૌ ભક્તિયોગા-
    દસ્માભિસ્તદ્ભવતુ ભગવંસ્ત્વત્પ્રસાદેન ધન્યમ્ ॥ ૪૮॥

યા પન્થાનં દિશતિ શિશિરાદ્યુત્તરં દેવયાનં
    યા વા કૃષ્ણં પિતૃપથમથો દક્ષિણં પ્રાવૃડાદ્યમ્ ।
તાભ્યામન્યા વિષુવદભિજિન્મધ્યમા કૃત્યશૂન્યા
    ધન્યા કાશ્ચિત્પ્રકૃતિપુરુષાવન્તરા મેઽસ્તુ વૃત્તિઃ ॥ ૪૯॥

સ્થિત્વા કિઞ્ચિન્મન ઇવ પિબન્સેતુબન્ધસ્ય મધ્યે
    પ્રાપ્યોપેયં જીવપદમથો વ્યક્તમુદ્ઘાટ્ય તાલુ ।
સત્યાદૂર્ધ્વં કિમપિ પરમં વ્યોમ સોમાગ્નિશૂન્યં
    ગચ્છેયં ત્વાં સુરપિતૃગતી ચાન્તરા બ્રહ્મભૂતઃ ॥ ૫૦॥

સર્વાત્મત્વં સવિતુરિતિ યો વાઙ્મનઃકાયબુદ્ધ્યા
    રાગદ્વેષોપશમસમતાયોગમેવારુરુક્ષુઃ ।
ધર્માધર્મગ્રસનરશનામુક્તયે યુક્તિયુક્તાં
    સ શ્રીસામ્બઃ સ્તુતિમિતિ રવેઃ સ્વપ્રશાન્તાં ચકાર ॥ ૫૧॥

ભક્તિશ્રદ્ધાદ્યખિલતરુણીવલ્લભેનેદમુક્તં
    શ્રીસામ્બેન પ્રકટગહનં સ્તોત્રમધ્યાત્મગર્ભમ્ ।
યઃ સાવિત્રં પઠતિ નિયતં સ્વાત્મવત્સર્વલોકાન્-
    પશ્યન્સોઽન્તે વ્રજતિ શુકવન્મણ્ડલં ચણ્ડરશ્મેઃ ॥ ૫૨॥

ઇતિ પરમરહસ્યશ્લોકપઞ્ચાશદેષા
    તપનનવનપુણ્યા સાગમબ્રહ્મચર્ચા ।
હરતુ દુરિતમસ્મદ્વર્ણિતાકર્ણિતા વો
    દિશતુ ચ શુભસિદ્ધિં માતૃવદ્ભક્તિભાજામ્ ॥ ૫૩॥

ઇતિ સામ્બપ્રણીતા સામ્બપઞ્ચાશિકા સમ્પૂર્ણા ॥

Proofread by Pallasena Narayanaswami ppnswami at gmail.com

---

*Samba Panchashika*

pdf was typeset on March 18, 2025

Please send corrections to *sanskrit@cheerful.com*